# संस्कृतवार्ता:

दिनाङ्क : 08.09.25 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- राष्ट्रपति: द्रौपदी-मुर्मू-वर्या भारतीय अर्थव्यवस्थाम् अधिकम् आत्मनिर्भरीकर्तुं निर्याते उत्कृष्टताया: आपादनस्य आवश्यकता सबलं प्रत्यपादयत्, नागरिकांश्च भारतम् वैश्विक-व्यापारस्य ज्ञानस्य च केन्द्रं विधातुम् अध्यर्थितवती।
- श्रम-जीविका-मन्त्री डॉ. मनसुख माण्डविया प्रोक्तवान् यत् आजीविकाया:, वृत्तेरवसराणां च उत्पादनं सुदृढ-आत्मनिर्भर-भारतस्य वर्तेते प्रमुख-स्तम्भौ।
- नेपाले सोशल मीडिया इति सामाजिक-सञ्चालेषु प्रतिबन्धं विरुध्य प्रदर्शनावसरे प्रदर्शनकारिणाम् आरक्षि-बलानां च मध्ये संघर्ष:, चतुर्दश जना: मृता: शताधिकाः च व्रणिताः।
- भारतीय-ऋतु-विज्ञान-विभागेन अद्य उत्तर-गुजराते, सौराष्ट्रे, राजस्थाने, सिक्किमे कच्छे च पृथक् पृथक् स्थानेषु प्रचण्ड-वृष्टे: अनुमानमस्ति कृतम्।

---

<u>राष्ट्रपति: ईईपीसी</u>

राष्ट्रपति: द्रौपदी मुर्मु: अद्य भारतीय अर्थव्यवस्थाम् अतोऽपि अधिकम् आत्मनिर्भरं कर्तुं निर्याते उत्कृष्टता-आपादनस्य आवश्यकतायां बलं प्रदत्तवती। राष्ट्रपति: नागरिकान् अध्यर्थितवती यद् भारतं ज्ञान-व्यापारयो: एकं प्रमुख-केन्द्रं विधातुं सविशेषं प्रयत्नशीला: भवेयुः। राष्ट्रपति: एतत् सर्वं नव-दिल्ल्यां आभियान्त्रिक-निर्यात-संवर्धन-परिषद: रजतजयन्ती-समारोहं संबोधयन्ती प्रावोचत्। असौ उक्तवती यत् कोविड-काले आत्मनिर्भर भारतस्य आधार: सुतरां स्थापित: ।

एषा अग्रे अवदत् यत् आत्मनिर्भर-भारतस्य एक: प्रमुख: आयाम: एतदपि भवेत् यत् वैश्विक-अस्थिरताया: राष्ट्रिय अर्थव्यवस्थायां न्यूनान्न्यून: प्रभाव: स्यात् । श्रूयतां तावत्.......

राष्ट्रपति: प्रावोचत् यत् अस्माकं देशे उपलब्धानाम् असाधारण क्षमतानाम् उपयोगेन वैश्विक-व्यापारस्य समस्या: अवसरत्वेन परिवर्तनीया: सन्ति। अनया एतत् विषये अपि प्रकाश: निक्षिप्त: यत् विश्व-व्यापार-व्यवस्थायाम् अन्ताराष्ट्रिय-आर्थिक-व्यवस्थायां च परिवर्तनस्य कारणेन, ई.ई.पी.सी. संस्थानस्य भूमिका अतोपि महत्वपूर्णा जातास्ति। राष्ट्रपति: प्रोक्तवती यत् ई.ई.पी.सी. अन्ताराष्ट्रियापणस्य भारतीयोत्पादकानां च मध्ये सेतुत्वेन कार्यम् आचरति। श्रूयतां तावत्................

-----------------------------------------------

**साहमत्यम् - माण्डविया:**

केन्द्रीय-मन्त्री डॉ मनसुख माण्डविया अद्य उल्लेखितवान् यत् जीविकोत्पादनम्, वृत्तेरवसराणां परिकल्पनं च सुदृढ-आत्मनिर्भर-भारतस्य प्रमुख-स्तम्भौ स्त:। असौ श्रम-जीविका-मन्त्रालयस्य एकस्य शासनेतर-समवायस्य च मध्ये नव दिल्ल्यां युवजनेभ्य: जीविकाप्रदानम् कौशल विकासं च वर्धयितुम् एकस्मिन् साहमत्य-ज्ञापन-पत्रके हस्ताक्षर-विधानावसरे सम्भाषते स्म। डॉ. माण्डविया उक्तवान् यत् शासनेतर-मञ्चै: साकं सहयोगेन जीविकाया: अवसरा: नूनमेव वर्धिष्यन्ते । कृषि-सेवा-आधारिक-संरचना-सन्निभानि महत्वपूर्ण-क्षेत्राणि सुदृढानि भविष्यन्ति। अस्मिन् प्रसङ्गे अमुना अग्रे प्रोक्तं यत् राष्ट्रिय करियर सेवा पोर्टल एकां महत्वपूर्ण-भूमिकां निर्वहति, यत्र एक-पञ्चाशत्-लक्षतोऽधिकानि पञ्जीकरणानि षट्-चत्वारिंशत्-लक्ष-मिताश्च रिक्तय: सूचीबद्धा: सन्ति, यत्र अष्ट सहस्र मिता: अन्ताराष्ट्रिया: वृत्तयश्चापि समविष्टा: सन्ति। श्रूयतां तावत्................

-----------------------------------------------

**नेपाल-विरोध:**

नेपाले सामाजिक-सञ्जाल-प्रतिषेधस्य सर्वकारस्य निर्णयं विरुध्य युवजनैः प्रवर्तिते विरोधप्रदर्शने न्यूनान्न्यूना: चतुर्दशजनाः मृताः शताधिकाश्च व्रणिताः सूच्यन्ते। काठमांडू-नगरस्य बानेश्वर-क्षेत्रे अद्य जेनरेशन जेड इति आधुनिक-पीठिकायाः युवकानां प्रदर्शनस्य हिंस्र-रूपे परिवर्तन-कारणेन आरक्षिभिः विहिते गोलिका-प्रहारे चतुर्दश जनाः मृताः सन्ति। प्रारम्भिक-विवरण-सूचनाभिः ज्ञायते यत् मृतकेषु पञ्च जनाः ट्रॉमा सेंटर मध्ये, अन्ये च सिविल-चिकित्सालये मृताः। कतिपय-पीड़ितानाम् अभिज्ञानस्य पुष्टिः नैव जातास्ति। शताधिकाः व्रणिताः जनाः चिकित्सालयेषु उपचाराधीनाः सन्ति। नेपाले सोशल मीडिया इति सामाजिकसाञ्जाले प्रतिबन्ध-प्रवर्तनात् आधुनिक-युवानः मार्गेषु विरोध-प्रदर्शनार्थं प्रेरिताः जाताः। प्रारम्भे शांतिपूर्ण-रीत्या विहितानि प्रदर्शनानि, प्रदर्शनकारिणां संघीय-संसद्-परिसरे प्रवेशानन्तरम् आरक्षि-बलेन साकं संघर्षाचरणेन च हिंस्राचरणे परिवर्तितानि। तदनन्तरं काठमांडू-प्रशासनेन काठमांडू-नगरस्य बानेश्वर-क्षेत्रे सञ्चार-रोधादेशः प्रवर्तितः अस्ति। सामाजिक-सञ्जालेषु प्रतिबन्धः गुरुवासरे तान् सामाजिक-सञ्जालीय-मञ्चान् लक्ष्यीकृत्य प्रवर्तितः, यैः सामाजिक-सञ्जालीय-मञ्चैः नेपाल-सर्वकारेण साकं पञ्जीकरणं नैव कृतम् आसीत्। नेपाल-सर्वकारस्य प्रबल-कथनम् अस्ति यत् भूरि वारं सञ्चेतनायाः अनन्तरम् अपि सामाजिक-सञ्जालीय-मञ्चैः स्थानीय अधिकारिभिः साकं पञ्जीकरणं नैव विहितम्, अत एव एषः प्रतिबन्धः प्रवर्तितः। अथ च एतत् पञ्जीकरणं सामग्रीणां विनिमये, अन्तर्जालीय-माध्यमेषु अभद्र-भाषाप्रयोगे मिथ्या-सूचना-प्रसारे च अङ्कुशार्थम् एतेषां सामाजिक-सञ्जालीय-मञ्चानां उत्तरदायित्वम् सुनिश्चेतुम् एकः आवश्यकः पदक्षेपः अस्ति। सर्वकारस्य एषः पदक्षेपः शीर्ष-न्यस्यालयस्य तस्मिन् निर्देशे आधारितः अस्ति यस्मिन् लाइसेंस इति अनुमति-पत्रकं विना सञ्चाल्यमानानां सामाजिक-सञ्जालीय-मञ्चानां नियमनस्य आह्वानं कृतम् आसीत्। अत्रान्तरे नेपालस्य प्रधानमन्त्रिणा के.पी. शर्मा ओली वर्येण अद्य सायम् काठमाण्डू-स्थिते आवासे मन्त्रि-परिषदः राष्ट्रिय-सुरक्षा-परिषदश्च आपात्कालिकम् उपवेशनम् आकारितम् अस्ति।

-----------------------------------------------

## उपराष्ट्रपति-निर्वाचनम्

उपराष्ट्रपति-पदस्य कृते निर्वाचनम् श्व: भविष्यति। एतस्मिन् निर्वाचने एन.डी.ए. संयुते: प्रत्याशी महाराष्ट्रस्य राज्यपाल: सी.पी. राधाकृष्णन्-वर्यस्य साम्मुख्यं इंडी संयुते: प्रत्याशिना सर्वोच्च-न्यायालयस्य च प्राक्तनेन न्यायाधीशेन बी सुदर्शन रेड्डी इत्यनेन साकं भविष्यति।

-----------------------------------------------

## प्रधानमन्त्री-पञ्जाब तोयप्लव:

प्रधानमन्त्री श्रीनरेन्द्रमोदी श्वः तोयप्लव- दुष्प्रभावितस्य पञ्जाबस्य वर्तमानस्थितिं निरीक्षितुं गच्छति। एष: तत्र समीक्षोपवेशनम् अपि आयोक्ष्यति इति सम्भाव्यते। पञ्जाब-सर्वकारः प्रधानमन्त्रिण: भ्रमणकाले तोयप्लव-प्रभावित-राज्यस्य कृते विंशति-सहस्र-कोटि-रूप्यकाणां सहयोग-पुटकम् अपि प्रार्थयितुम् इच्छति।

-----------------------------------------------

## ऋतुविभाग:

भारतीय-ऋतु-विज्ञान-विभागेन अद्य उत्तर-गुजराते, सौराष्ट्रे, राजस्थाने, सिक्किमे कच्छे च पृथक् पृथक् स्थानेषु प्रचण्ड-वृष्टे: अनुमानमस्ति कृतम्। हिमाचलप्रदेशस्य केषुचित् भागेषु साम्प्रतम् अपि वृष्टिः निरन्तरं प्रचलति। यद्यपि राज्यस्य अनेकेषु क्षेत्रेषु प्रचण्डवृष्टिः न्यूनीभूता वर्तते। अत्रान्तरे प्रशासनेन साहाय्योद्धार-कार्याणि युद्धस्तरे तीव्रीकृतानि सन्ति । उत्तर-गुजरातस्य अनेकेषु भागेषु वृष्टेः तीव्रता न्यूनीभूतास्ति, ध्येयमस्ति यत् तत्र ह्यः प्रचण्डवृष्टिः जाता आसीत्। येन अद्यापि बहूनि क्षेत्राणि जलमग्नानि एव तिष्ठन्ति अथ च अस्य प्रदेशस्य सामान्यजनजीवनं बाधितम् अस्ति।

-----------------------------------------------

## भारतेन एशिया-चषक- महिला -हॉकी स्पर्धायै समर्हताधिगता

भारतेन एशिया-चषकीय-महिला-हॉकी विजेतृ-स्पर्धायै समर्हतां समधिगम्य इतिहासो रचितः। भारतेन दक्षिण-सिङ्गापुर-दलम् शून्यं विरुध्य द्वादश-अंङ्कैः पराजित्य समर्हता अधिगता।

-----------------------------------------------

## प्रधानमन्त्री कार्यशाला

भाजपादलस्य एन.डी.ए. संयुतेश्च सांसदानां द्वि-दिवसीय- कार्यशाला वर्तमाने नव दिल्ल्या: संसद्-परिसरस्य बालयोगी सभागारे प्रचलति। एषा कार्यशाला ह्यः प्रारब्धा आसीत्। प्रधानमन्त्री नरेंद्र मोदी कार्यशालायाम् उपस्थित: अस्ति। भाजपा-संसदीय-दलेन प्रस्ताव-पूर्वकं विनिर्मातृभ्य: व्यापारि-जनेभ्यः उपभोक्तृभ्यश्च जी.एस.टी. परिमितेरल्पीकरणस्य लाभ प्रापणार्थं कृतम् अस्ति आह्वानम्; प्रधानमन्त्री नरेन्द्र मोदी सांसदानां कार्यशालाया: समापन-सत्रं सम्बोधयिष्यति।

।। इति वार्ता:।।